संस्कृत-वार्ता:

18.04.2024

सायम् - 06:20

<u>मुख्यवार्ता:</u>

- प्रथमचरणस्य लोकसभा-निर्वाचनार्थं सर्वा: सज्जता: समभवन्। अस्मिन् चरणे सप्तदशराज्यानां एवं चतुर्णां केन्द्रशासित-प्रदेशानां द्वयधिकशत-संख्याकेषु निर्वाचनक्षेत्रेषु मतदानानि भविष्यन्ति।
- लोकसभा-निर्वाचनानां चतुर्थचरणाय अधिसूचना अद्य सम्प्रसारिता। चरणेऽस्मिन् मे-मासस्य त्रयोदश-दिनाङ्के नव-राज्येषु एकस्मिन् केन्द्रशासित-प्रदेशे षण्णवति: लोकसभासनेभ्य: मतदानानि भविष्यन्ति।
- सर्वकारेण अन्तरिक्ष-क्षेत्रस्य कृते शत-प्रतिशतं एफडीआई-अनुमति-प्रदाननिर्णयस्य क्रियान्वयनार्थं विदेशी-मुद्रा-प्रबन्धन-अधिनियमान्तर्गतं संशोधित-नियमा: अधिसूचिता:।
- कश्मीर-घाट्यां गतसायं आतंकवादिभि: अनन्तनागजनपदस्य विजबेहराक्षेत्रस्य जबलीपोरायां एक: व्यक्ति: भुशुण्डिकया मारित:।

भारतीय-ऋतु-विज्ञान-विभागेन आगामि त्रिषु दिवसेषु ओडिशायां तमिलनाडुराज्ये-तटीयान्ध्रप्रदेशे पश्चिम-बंगाले च प्रगाढ़-उष्णलहर्या: प्रभावो भविष्यतीति प्रख्यापितम्।

- आई.पी.एल. क्रिकेटमालायां पंजाब-किंग्स-दलम् अद्य चण्डीगढ़-नगरे मुम्बई इण्डियन-दलेन सह स्पर्धयिष्यति।

थमचरणे- मतदानम्

प्रथमचरणस्य लोकसभा-निर्वाचनार्थं सर्वा: सज्जता: समभवन्। अस्मिन् चरणे सप्तदशराज्यानां एवं चतुर्णां केन्द्रशासित-प्रदेशानां द्वयधिकशत-संख्याकेषु निर्वाचनक्षेत्रेषु मतदानानि भविष्यन्ति। लोकसभा-निर्वाचनस्य प्रथमचरणे पञ्चविंशत्यधिक-षड्शतोत्तरैकसहस्त्र-प्रत्याशिन: सज्जा: सन्ति। एतस्मिन् चरणे प्रचाराभियानानि ह्य: सायं समाप्तिङ्गतानि। प्रथमचरणे अरुणाचल-प्रदेश-मेघालय-मिजोरम- नागालैंड-सिक्किम-अंडमान एवं निकोबार द्वीप समूह-लक्षद्वीप-पुडुचेरी-उत्तराखंड-तमिलनाडु- चेत्यादिषु संसदीयक्षेत्रेषु मतदानानि भविष्यन्ति। लोकसभा-निर्वाचनस्य प्रथमचरणस्य मतदानम् अतिरिच्य श्व: एतस्मिन्नेव चरणे अरुणाचलप्रदेश- सिक्किमयो: नव-विधानसभा-निर्वाचनार्थमपि मतदानानि भविष्यन्ति।

निर्वाचनम्-तृतीयचतुर्थचरणयो

लोकसभा-निर्वाचनानां चतुर्थचरणाय अधिसूचना अद्य सम्प्रसारिता। चरणेऽस्मिन् मे-मासस्य त्रयोदश-दिनाङ्के नव-राज्येषु एकस्मिन् केन्द्रशासित-प्रदेशे षण्णवति: लोकसभासनेभ्य: मतदानानि भविष्यन्ति। प्रत्याशिन: अप्रैलमासस्य पञ्चविंशति: दिनाङ्कं यावत् स्वीय नामाङ्कनं दातुं शक्नुवन्ति। अत्रावसरे लोकसभा-निर्वाचनस्य तृतीय-चरणार्थं नामांकन-प्रपूरणस्य काल: श्व: समाप्तिमेष्यति। एतस्मिन् चरणे मे-मासस्य सप्तम-दिनाङ्के दशराज्येषु द्वयो: केन्द्रशासितप्रदेशयो: चतुर्नवति: संसदीयासनेभ्य: मतदानानि भविष्यन्ति। लोकसभाया: कृते त्रिचत्त्वारिंशदधिक-पञ्चशत-सदस्यानां निर्वाचनार्थं चतुर्विंशत्यधिक-द्विसहस्त्रतमस्य सामान्य-निर्वाचनानि अप्रैलमासस्य एकोनविंशति: दिनाङ्कात् जूनमासस्य प्रथमदिनाङ्कं यावत् सप्तचरणेषु जायमानानि सन्ति। मतगणना जूनमासस्य चतुर्थदिनाङ्के भविष्यति।

सर्वकार:-अन्तरिक्ष निवेश:

सर्वकारेण अन्तरिक्ष-क्षेत्रस्य कृते शत-प्रतिशतं एफडीआई-अनुमति-प्रदाननिर्णयस्य क्रियान्वयनार्थं विदेशी-मुद्रा-प्रबन्धन-अधिनियमान्तर्गतं संशोधित-नियमा: अधिसूचिता:। वित्तमन्त्रालयस्य अधिसूचनानुसारं उपग्रहादीनां निर्माणार्थं सञ्चालनार्थञ्च शत-प्रतिशतं प्रत्यक्ष-विदेशी-निवेशस्य अनुमति: प्रदत्तास्ति। एतस्मिन् चतुस्सप्तति: प्रतिशतं यावत् स्वचालित-मार्गेण भविष्यति एवं चतुस्सप्तति: प्रतिशतादधिक-निवेशार्थं सर्वकारस्य अनुमते: आवश्यकता भविष्यति।

## राज्यसभा-नवनिर्वाचित:

राज्यसभाया: सभापति: जगदीप-धनखड़: अद्य संसद-भवने उच्च-सदनस्य नवनिर्वाचित-सदस्येभ्य: शपथ वचनं दापितवान्। श्री धनखड़ेन भीमसिंह-परमार जसवन्तसिंह: सलामसिंह:, संगीता, नवीन-जैन:, डॉ. सुधांशु त्रिवेदी च इत्येतेभ्य: शपथवचनं दापितम्।

## आन्ध्रप्रदेश-निर्वाचनम्

आन्ध्रप्रदेशस्य विधानसभा-निर्वाचनाधिसूचना अद्य प्रकाशिता। पञ्चसप्तत्यधिकैकशत-विधासभासनेषु अग्रिममासस्य त्रयोदशदिनांके एकस्मिन्नेव चरणे निर्वाचनं भविष्यति। अधिसूचना-प्रसारणानन्तरमेव राज्ये नामांकन प्रक्रियापि समारब्धा। नामांकन-प्रपूरणस्य अन्तिमा-तिथि: अस्य मासस्य पञ्चविंशे दिनांके भविष्यति। मतदानगणना जूनमासस्य चतुर्थदिनांके भविष्यति।

## लोकसभा-निर्वाचन

लोकसभा-निर्वाचनार्थं भाजपेति दलेन अद्य त्रयोदश-तमा-सूचि-प्रकाशिता। महाराष्ट्रस्य रत्नागिरी-सिन्धुदुर्ग-संसदीय-क्षेत्रात् भाजपेति दलस्य केन्द्रीय-मन्त्री नारायण-राणे इत्येष: दलेन निर्वाचित:। तथा च कांग्रेस दलेन अद्य ओडिशा-विधानसभा-निर्वाचनाय चतुर्णाम् प्रत्याशिनां सूचि: प्रकाशिता। भुवनेश्वर-क्षेत्रात् प्रकाशचन्द्र-जेनां सहैव-सत्यबाड़ी-क्षेत्रात् मनोज-रथ: इत्येतौ प्रत्याशिनौ भविष्यत:।

## जयशंकर

अफगानिस्तानदेशे संयुक्तराष्ट्रसंघस्य सहायता-अभियानस्य प्रमुखा विशेषप्रतिनिधि: रोजा ओटुनबायेवा इत्येषा अद्य नवदिल्ल्यां विदेशमन्त्रिणा डॉ.एस.जयशंकरेण सह मिलितवति। अत्रावसरे अफगानिस्तानस्य वर्तमानस्थिते: विषये तयो: विचारविनिमय: अभवत्। डॉ.एस.जयशंकर: प्रोक्तवान् यत् भारतेन अफगानिस्तानदेशाय गोधूम: औषधानि, कीटनाशकानि विद्यालयसामग्र्य: च प्रदत्तानि सन्ति। तेन एतस्मिन् सहभागितायै संयुक्तराष्ट्रसंघस्य भूमिकाया: अपि प्रशंसा विहिता।

## जम्मू-कश्मीर – आतंकी-प्रहार:

कश्मीर-घाट्यां गतसायं आतंकवादिभि: अनन्तनागजनपदस्य विजबेहराक्षेत्रस्य जबलीपोरायां एक: व्यक्ति: भुशुण्डिकया मारित: मृतकस्य परिचय: बिहारस्य राजूशाह रूपेण अभवत्। घटनाया: अनन्तरं आरक्षकै: स: पार्श्वस्थ-चिकित्सालये नीत:। सुरक्षाबलै: आतंकवादिनां अन्वेषणार्थं क्षेत्रे अन्वेषणाभियानं सञ्चाल्यते। एकस्यां विज्ञप्त्यां उपराज्यपाल मनोजसिन्हा इत्येष: अस्या: घटनाया: निन्दां अकरोत् सदैव मृतकस्य परिवाराय च स्वीय-संवेदना प्रकटितवान्। तेनोदीरितं यत् सम्पूर्णदेश: एतस्मिन् समये दु:खं अनुभवति सहैव तेन कथितं यत् शीघ्रमेव एतदर्थं दोषिण: प्रशासनेन दण्डयिष्यन्ते।

## जम्मू-कश्मीर-धूम्रपानमुक्त:

जम्मू-कश्मीरे केन्द्रशासित-प्रदेशस्य मुख्यनिर्वाचनाधिकारिणा जम्मू-कश्मीरस्य सर्वाण्यपि मतदानकेन्द्राणि तंबाकू-मुक्तक्षेत्रत्वेन घोषितानि सन्ति। आकाशवाण्या: जम्मू-संवाददात्रा एकस्मिन् प्रतिवेदने विज्ञापितं यत् अयं निर्णय: स्वास्थ्य-सेवा-निदेशालय-कश्मीरस्य एकस्य निर्देशस्य पालनं करोति। एतस्मिन् मतदानकेन्द्रेषु धूम्रपानमुक्त-वातावरण-सुनिश्चयार्थं आग्रह: कृतो वर्तते। अयं पदक्षेप: भारत-सर्वकारस्य नियमानां सहैव विश्व-स्वास्थ्य-संगठन-फ्रेमवर्क-कन्वेंशन-ऑन-टौबैको-कंट्रोल इत्यस्यानुरूप वर्तते। उल्लेखनीयं वर्तते यत् जम्मू-कश्मीर: तादशेषु राज्येषु/केन्द्रशासितप्रदेषु वा प्रथम अस्ति यत्र एतादृश: आदेश: प्रसारित:।

## ऋतुविभाग:-उष्णलहरी

भारतीय-ऋतु-विज्ञान-विभागेन आगामि त्रिषु दिवसेषु ओडिशायां तमिलनाडुराज्ये-तटीयान्ध्रप्रदेशे पश्चिम-बंगाले च प्रगाढ़-उष्णलहर्या: प्रभावो भविष्यतीति प्रख्यापितम्। एतेषु क्षेत्रेषु तापमानं चत्वारिंशत् डिग्री-सेल्सियस-मितादपि अधिकस्य संभावना वर्तते। ऋतु-विज्ञान-विभागेन झारखण्ड-उत्तरी-कोंकण-सौराष्ट्र-मध्य-महाराष्ट्र-तेलंगाना-तमिलनाडु-पुद्दुचेरी-चेत्यादिषु स्थलेष्वपि उष्णलहर्या: प्रभाव: संभावित:। आकाशवाण्या: वार्ताहरै: सह संवादे ऋतु-विज्ञान-विभागस्य वरिष्ठ-वैज्ञानिक: आर.के.जैनामणि: जनान् एतस्मिन् संदर्भे अवधानतायै संप्रार्थितवान्। तेनोदीरितं यत् उत्तरभारते उष्णलहर्या: अधिको प्रभाव: न भविष्यति। दिल्ली-राजस्थान-पंजाब-हरियाणादिषु सामान्यवृष्टे: संभावना वर्तते। हिमाचलप्रदेशे अतिवृष्टि: संभाव्यते।

## इज़राइल-ईरान

यूरोपीय-संघस्य नेतृभि: इज़राइल-देशोऽपरि प्रक्षेपणास्त्राणां प्रहारानन्तरं ईरानस्योपरि नूतन-प्रतिबन्धार्थं सहमति: प्रकटिता। अयं निर्णय: तदा आगत: यदा यूरोपीय-संघस्य नेतार: ब्रसेल्स मध्ये द्विदिवसीय-शिखर-सम्मेलनार्थं एकत्रिता: आसन् यूरोपीयसंघस्य नेतृभि: समेऽपि पक्षा: अवधानाय सहैव संयमस्थापनाय संप्रार्थिता:। ईरानेन सप्ताहान्ते इज़राइलदेशं विरूध्य प्रक्षेपास्त्रेण प्रहार: विहित:।

## आईपीएल

आई.पी.एल. क्रिकेटक्रीडायां पंजाब-किंग्स-दलम् अद्य चण्डीगढ़-नगरे मुम्बई इण्डियन-दलेन सह स्पर्धयिष्यति। एषा प्रतिस्पर्धा अद्य सायं सार्ध-सप्तवादने समारप्स्यते। ह्य: दिल्ली-कैपिट्ल्स-दलेन गुजरात-टाइटन्स-दलं षड् क्रीडकाणां हानिपुरस्सरं पराजितम्।

।। इति वार्ता: ।।